# শ্রীমঙ্গলচণ্ডিকাস্তোত্রম্

{॥ শ্রীমঙ্গলচণ্ডিকাস্তোত্রম্ ॥}

ওঁ হ্রীং শ্রীং ক্লীং সর্বপূজ্যে দেবী মঙ্গলচণ্ডিকে ।

ঐং ক্রূং ফট্ স্বাহেত্যেবং চাপ্যেকবিংশাক্ষরো মনুঃ ॥ ২০॥

পূজ্যঃ কল্পতরুশ্চৈব ভক্তানাং সর্বকামদঃ ।

দশলক্ষজপেনৈব মন্ত্রসিদ্ধির্ভবেন্নৃণাম্ ॥ ২১॥

মন্ত্রসিদ্ধির্ভবেদ্ যস্য স বিষ্ণুঃ সর্বকামদঃ ।

ধ্যানঞ্চ শ্রূয়তাং ব্রহ্মন্ বেদোক্তং সর্ব সম্মতম্ ॥ ২২।

দেবীং ষোডশবর্ষীযাং রম্যাং সুস্থিরযৌবনাম্ ।

সর্বরূপগুণাঢ্যাঞ্চ কোমলাঙ্গীং মনোহরাম্ ॥ ২৩॥

শ্বেতচম্পকবর্ণাভাং চন্দ্রকোটিসমপ্রভাম্ ।

বহ্নিশুদ্ধাংশুকাধানাং রত্নভূষণভূষিতাম্ ॥ ২৪॥

বিভ্রতীং কবরীভারং মল্লিকামাল্যভূষিতম্ ।

বিম্বোষ্টিং সুদতীং শুদ্ধাং শরৎপদ্মনিভাননাম্ ॥ ২৫॥

ঈষদ্ধাস্যপ্রসন্নাস্যাং সুনীলোৎপললোচনাম্ ।

জগদ্ধাত্রীঞ্চ দাত্রীঞ্চ সর্বেভ্যঃ সর্বসম্পদাম্ ॥ ২৬॥

সংসারসাগরে ঘোরে পীতরূপাং বরাং ভজে ॥ ২৭॥

দেব্যাশ্চ ধ্যানমিত্যেবং স্তবনং শ্রূযতাং মুনে ।

প্রযতঃ সঙ্কটগ্রস্তো যেন তুষ্টাব শঙ্করঃ ॥ ২৮॥

॥ শঙ্কর উবাচ ॥

রক্ষ রক্ষ জগন্মাতর্দেবি মঙ্গলচণ্ডিকে ।

সংগত্রিং বিপদাং রাশের্হর্ষমঙ্গলকারিকে ॥ ২৯॥

হর্ষমঙ্গলদক্ষে চ হর্ষমঙ্গলচণ্ডিকে ।

শুভে মঙ্গলদক্ষে চ শুভমঙ্গলচণ্ডিকে ॥ ৩০॥

মঙ্গলে মঙ্গলার্হে চ সর্বমঙ্গলমঙ্গলে ।

সতাং মঙ্গলদে দেবি সর্বেষাং মঙ্গলালযে ॥ ৩১॥

পূজ্যা মঙ্গলবারে চ মঙ্গলাভীষ্টদৈবতে ।

পূজ্যে মঙ্গলভূপস্য মনুবংশস্য সন্ততম্ ॥ ৩২॥

মঙ্গলাধিষ্টাতৃদেবি মঙ্গলানাং চ মঙ্গলে ।

সংসার মঙ্গলাধারে মোক্ষমঙ্গলদাযিনি ॥ ৩৩॥

সারে চ মঙ্গলাধারে পারেত্বং সর্বকর্মণাম্ ।

প্রতিমঙ্গলবারে চ পূজ্যে চ মঙ্গলপ্রদে ॥ ৩৪॥

স্তোত্রেণানেন শম্ভুশ্চ স্তুত্বা মঙ্গলচণ্ডিকাম্ ।

প্রতিমঙ্গলবারে চ পূজাং কৃত্বাগতঃ শিবঃ ॥ ৩৫॥

দেব্যাশ্চ মঙ্গলস্তোত্রং যঃ শৃণোতি সমাহিতঃ ।

তন্মঙ্গলং ভবেচ্ছশ্বন্ন ভবেত্ তদমঙ্গলম্ ॥ ৩৬॥

॥ ইতি শ্রী ব্রহ্মবৈবর্তে দ্বিতীযে প্রকৃতিখণ্ডে

নারদ নারাযণসংবাদে মঙ্গলচণ্ডিকা স্তোত্রং সম্পূর্ণম্ ॥

Prakruti-Khanda, BrahmaVaivarta Purana (Adhyaya 44 shloka 20-36)

Encoded and proofread by Prakash Ketkar

English and Marathi Translation and audio are at

http://ioustotra.blogspot.com/2011/09/mangal-chandika-stotramtml

Brahmavaivarta Purana text is on archive.org

Proofread byDPD

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Mangala Chandika Stotram Lyrics in Bengali PDF
% File name : mangalachaNDikAstotra.itx
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Prakash Ketkar English and Marathi translation and audio at
% Proofread by : Prakash Ketkar,DPD
% Description-comments : Prakruti-Khanda, BrahmaVaivarta Purana (Adhyaya 44 shloka 20-36)
% Source : http://ioustotra.blogspot.com/2011/09/mangal-chandika-stotram.html Also Brahmavaivarta Purana text is on archive.org
% Latest update : September 5, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 14, 2015 ] at Stotram Website